# श्री सुरसरस्वती सभा शृङ्गेरि

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – २९-८-२०१० | अङ्काः–१००

पूर्वाह्ने - १०-०० तः १-०० पर्यन्तम् | समयः–घण्टात्रयम्

**1 पञ्चानां एकवाक्येन उत्तरं लिखत ।** 5

१. कस्यौषधं नास्ति ?

२. हिमालयः क इव अस्ति ?

३. समृद्धयः कथं निवसन्ति ?

४. अलका नाम केषां वसतिः ?

५. मातङ्गः स्वपूर्ववृत्तान्तं कस्मै अकथयत् ?

६. अर्जुनः कथं पुनर्नवो बभूव ?

७. बकासुरहनने कस्य प्रथमं भयमागतम् ?

८. केशवदासो नाम ब्राह्मणः कुत्र किमर्थं प्रस्थितः ?

**2 पञ्चानां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 10

१. कम् अर्चामः कान् निहन्मः ?

२. द्वितीयः ब्राह्मणपुत्रः किमर्थं 'धन्योऽस्मि' इति कथयति ?

३. कन्यका स्वमातरं किमाह ?

४. भीषस्य आशयं कः कथमपूरयत् ?

५. राजवाहनः विन्ध्याटवीमध्ये कीदृशं पुरुषं ददर्श ?

६. यक्षः कुत्र वसतिं चक्रे ? कस्मिन् दिवसे सः प्रेक्षणीयं ददर्श ?

७. कीदृशं नृपं प्रजाः प्रणमन्ति ?

**3 द्वयोः पञ्चषैः वाक्यैः उत्तरं लिखत ।** 8

१. भीष्मः कृष्णं किमाबभाषे ?

२. गौरीपतिः मातङ्गं स्वप्ने किमवदत् ?



पश्चादनुवर्तते

३. कः ब्राह्मणजनं वित्रासयति ? सः कीदृशः ?

४. विप्रकुटुम्बस्य सम्भूतापत् का ? तस्याः निवारणं कथमभवत् ।

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत ।** 9

१. नाब्धिः क्षुभ्यति न प्रसीदति ततो न क्षीयते नैधते ।

२. पूज्यतमाः खलु ब्राह्मणाः ।

३. वधाय कल्पितश्छागः पर्णं भक्षयितुमिच्छति ।

४. संस्कारानुरूपं हि सर्वं चेष्टितम् ।

५. संप्रति महान्नयनोत्सवो जातः ।

**5 द्वयोः भावं विशदयत ।** 8

१. कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छाया तरुषु वसतिं रामगिर्याश्रमेषु ।।

२. मतिमान् विनयप्रमाथिनः
समुपेक्षेत समुन्नतिं द्विषः ।
सुजयः खलु तादृगन्तरे
विपदन्ता ह्यविनीत सम्पदः ।।

३. अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ।।

**6 श्लोकद्वयं पूर्णं लिखत ।** 6

१) विपदि ............................................ ।

.......................................... महात्मनाम् ।।

२) प्रथमवयसि ........................................

........................................ विस्मरन्ति ।।

7 **एकस्य कवेः देशकालग्रन्थान् अधिकृत्य लिखत ।** 4

१) दण्डी २) नीलकण्ठदीक्षितः ३) भासः

8 **एकस्य लघुटिप्पणीं लिखत ।** 4

१) कुन्ती २) घटोत्कचः

9 **चत्वारि पदानि वाक्ये योजयत ।** 4

१) पर्यायक्रमेण २) सन्निहितः ३) उपेत्य
४) अस्मि ५) बहुधा ६) मात्रा

10 **चतुर्णां रूपाणि विवेचयत ।** 4

१) गिरम् २) अद्रौ ३) हन्मि
४) अटन्ती ५) व्रजसि ६) अपसर

11 **चतुर्णां पर्यायपदानि लिखत ।** 4

१) आयोधनम् २) यामिनी ३) गीर्वाणपतिः
४) प्रत्यूहः ५) अब्धिः ६) जगच्चक्षुः

12 **चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** 4

१) भूतबलिः २) कुसुमकोमलम् ३) षडङ्गम्
४) मृगपक्षिणः ५) हतशत्रुः ६) आमुक्ति

13 **चतुर्णां सन्धिं विभज्य नाम लिखत ।** 4

१) अम्बुमुचस्तपन्तु २) खल्वेषः ३. तावदेनम्
४) चिन्मयः ५) यदैव ६) शुभैर्गुणैः



पश्चादनुवर्तते

**14** **द्वयो: व्याकरणविशेषं लिखत ।** 4

१) पाञ्चालराज: २) अलं परिश्रमेण ३) वैराटि:

**15** **समासमेकं सलक्षणं विशदयत ।** 4

१) कर्मधारय: २) उपपद समास:

**16** **इतरवचनरूपाणि लिखत ।** 4

१) सुखाय ................ ................ ।

२) ................ ................ शरीरिणाम् ।

३) ................ ................ द्विष: ।

४) श्वा ................ ................ ।

**17** **रिक्तस्थानानि पूरयत ।** 4

१) किं किं न साधयति ................ विद्या ।

२) ननु पापा: न हन्तव्यो ................

३) भारतयुद्धं ................ धृतराष्ट्राय व्याचख्यौ ।

४) न खलु एकचक्रो ................ याति ।

**18** **चतुर्थं पदं लिखत ।** 4

१) कुमारसम्भवम् ; कालिदास: – किरातार्जुनीयम् ................

२) दैन्यम् ; अदैन्यम् – मत्सर: ................

३) गिरिवनजलपुष्पै: ; द्वन्द्व: – नागेन्द्र: ................

४) वैकर्तन: ; कर्ण: – वार्ष्णेय: ................

**19** **द्वयो: तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** 6

१) अवोचत् २) पिनष्टु ३) जागर्ति

४) गम्यताम् ५) सेविष्यते ६) चक्रे

* * * * *

# श्री सुरसरस्वती सभा शृङ्गेरि

## तुरीया परीक्षा

## द्वितीयपत्रिका

दिनाङ्कः – २९–०८–२०१० अङ्काः–५०

अपराह्ने – १-३० तः ३-०० पर्यन्तम् समयः–सार्धैकहोरा

**1** अ) **विषयमेकमधिकृत्य दशभिर्वाक्यैः प्रबन्धमेकं लिखत -** 5

१) ग्रन्थालयः २) परिसरः ३) जनसंख्यास्फोटः

आ) **सप्तविभक्तीनां अर्थाः के ? सोदाहरणं विवृणुत ।** 5

**2** अ) **भावे प्रयोगस्य नियमः कः ? सोदाहरणं विवृणुत ।** 4

**अथवा**

आ) **काव्यं नाम किम् ? कति विधाः अर्थाः सन्ति ? ते के ?**

**3** **द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** 6

१. पपाच २. वर्धिता ३. अयासीत्

४. अलप्स्यत ५. युज्यते ६. अराजत

**4** **अर्थान्तरन्यासालङ्कारं सोदाहरणं विवृणुत ।** 3

**5** **'प्रियेषु सौभाग्यफला हि चारुता' अत्रत्यं वृत्तं सप्रस्तारं सलक्षणं च निरूपयत।** 3

**6** **उत्तरयत ।** 4

१. अलङ्कारविभागौ कौ ?
२. लुङ्लकारः कस्मिन्नर्थे प्रयुज्यते ?
३. 'इयं साक्षाल्लक्ष्मीः' अत्र कोऽलङ्कारः ?
४. अनुष्टुभ् छन्दसि कति अक्षराणि भवन्ति ?

**7** **प्रयोगपरिवर्तनं कुरुत ।** 4

१. अहं अलज्जे । २. हनूमान् लङ्कां प्राविशत् ।

३. राज्ञ अपराधी दण्ड्यते । ४. शिशुः क्षीरं पिबति ।



पश्चादनुवर्तते

**8** **दोषान् परिहरत ।** 6

१. हरिः वैकुण्ठे अधिवसति ।

२. धनस्य अन्तरेण कार्यं न सिद्ध्यति ।

३. बालकः व्याघ्रेण त्रस्यति ।

४. नमो हरे ।

५. अलं क्रीडा ।

६. पुत्रस्य साकं पिता गतः ।

**9** **स्वोत्तरभाषया अनुवदत । (पञ्चानामेव)** 5

१. अन्तरेण गुरुशुश्रूषां नावाप्यते विद्या ।

२. श्रुतं मया यावं वाराणसीं ययाथ ।

३. नवरात्रोत्सवे वयं शृङ्गेरीं यातास्मः ।

४. कः खलु प्रवचनसमये शब्दमकरिष्यत् ।

५. शान्ते कर्मणि बेतालोदयः ।

**10** **संस्कृतेनानुवदत ।** 5

1. ಮನೆಗಳು ದೋಚಲ್ಪಟ್ಟ ಮೇಲೆ ಪೋಲೀಸಿನವರು ಬಂದರು.
   Police came after houses were robbed.
2. ಸತ್ಯ ವಾದಿಗಳಲ್ಲಿ ಹರಿಶ್ಚಂದ್ರ ಶ್ರೇಷ್ಠ.
   Among true men, Harishchandra is great.
3. ಅವಳು ಭಾರತೀಯ ಸಂಸ್ಕೃತಿಯನ್ನು ಕುರಿತು ಸಭೆಯಲ್ಲಿ ಮಾತನಾಡುವಳು.
   She will speak about Indian culture in the sabha.
4. ಮಗಳು ಪರೀಕ್ಷೆಯಲ್ಲಿ ಉತ್ತೀರ್ಣಳಾಗಲು ತಂದೆತಾಯಿಗಳು ಸಂತೋಷಿಸಿದರು.
   Father and Mother felt happy when the daughter passed in the exams.
5. ಕಾಳಿದಾಸನು ರಘುವಂಶವೆಂಬ ಕಾವ್ಯವನ್ನು ರಚಿಸಿದನು.
   Kalidasa wrote kavya named Raghuvamsha.

* * * * *